03-06-21

साहित्य (प्रतिष्ठा) | शास्त्री- III | श्लोकव्याख्या ।
अष्टम् पत्रम् । | मालविकाग्निमित्रम् ।

"दीर्घाक्षं शरदिन्दुकान्तिवदनं बाहू नतावंसयोः
संक्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।
मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली
छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ॥"

महाकविकालिदासरचित मालविकाग्निमित्रनाटकस्य द्वितीयाङ्कात् उद्धृतोऽयं श्लोकः ।
राज्ञः अग्निमित्रस्येदं कथनं मालविकां प्रति ।

अन्वयः → वदनं दीर्घाक्षं शरदिन्दुकान्ति च बाहू अंसयोः नतौ, उरः निविडोन्नतस्तनं संक्षिप्तं च, पार्श्वे प्रमृष्टे इव, मध्यः पाणिमितः जघनं च अमितम् पादौ अरालाङ्गुली नर्तयितुः मनसि यथा छन्दः तथा एव अस्याः वपुः श्लिष्टम् ।

शब्दार्थाः → वदनम् = मुखम् । दीर्घाक्षम् = दीर्घे अक्षिणी यत्र तत्, विशाललोचनम् । शरदिन्दुकान्ति = शारदचन्द्रतुल्यम् । बाहू = भुजौ । अंसयोः = स्कन्धद्वये । नतौ = नम्रौ । उरः = वक्षस्थलम् । निविडोन्नतस्तनम् = पीनोन्नतस्तनमण्डलम् । प्रमृष्टे इव = पाणिना परिमार्जिते इव । मध्यः = कटि प्रदेशः । पाणिमितः = मुष्टिमात्रमेयः । अमितम् = विशालम् । अरालाङ्गुली = वक्राङ्गुली । मनसि = हृदये । श्लिष्टं = शिक्षाभ्यासादिना योजितम् । वपुः = शरीरम् ।

अस्मिन् श्लोके संकरोऽलङ्कारः । कथं ?
काव्यलिङ्गोपमोत्प्रेक्षाद्वारेण ।
शार्दूलविक्रीडितछन्दश्च ।

03-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

अनिवार्यपत्रम् । शास्त्री II 03-06-2021

साहित्यम् रघुवंशम् । श्लोकव्याख्या ।

व्याकरण के छात्र हेतु । पुनरावृत्तिः ।

" तस्मिन्विधानातिशये विधातुः कन्यामये नेत्रशतैकलक्ष्ये ।
निपेतुरन्तःकरणैर्नरेन्द्रा: देहैः स्थिता केवलमासनेषु ॥ "

श्लोकोऽयं महाकविकालिदासस्य रचितस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमतीस्वयंवरवर्णनप्रसङ्गात् गृहीतोऽस्ति ।

इन्दुमती स्वयंवरस्थले प्रविशति । कविः अत्र तद्दर्शनेन भूपालकानां स्थितिविशेषं वर्णयति । विधातुः सृष्टिविशेषामिन्दुमतीं विलोक्य सर्वे राजानः चित्तैः तस्यामेव संलग्नाः बभूवुः, मञ्चेषु देहैः केवलं ते आसन् ।

अन्वयः → नेत्रशतैकलक्ष्ये कन्यामये तस्मिन् विधातुः विधानातिशये नरेन्द्राः अन्तःकरणैः निपेतुः केवलम् आसनेषु देहैः स्थिताः ।

शब्दार्थः व्याकरणञ्च → नेत्रशतैकलक्ष्ये → नेत्राणां शतानाम् एकः च असौ लक्ष्यः, तस्मिन् ( बहुनेत्रैकदृश्ये ) । कन्यामये = कन्यास्वरूपे । तस्मिन् = पूर्वोक्ते । विधातुः = स्रष्टुः । विधानातिशये → विधानस्य अतिशयः, तस्मिन् ( सृष्टिकार्यविशेषे ) । नरेन्द्राः - नर+इन्द्राः ( नृपाः ) । अन्तःकरणैः = मनोभिः । निपेतुः = संसक्ताः बभूवुः । केवलम् = मात्रमेव । आसनेषु = मञ्चेषु । देहैः = शरीरैः । स्थिताः = अवस्थिताः ।

अस्मिन् श्लोके शृङ्गाररसः, वैदर्भीरीतिः, प्रसादगुणः, स्वाभावोक्तिरलङ्कारः, उपजातिछन्दश्च ।

[signature] 03-06-2021

डॉ० निर्मल कुमार झा, ( स० प्राचार्य )

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ ।

03-06-2021

उपशास्त्री

अनिवार्य प्रथमपत्रम् ।

संस्कृतानुवादः → आज अनुवाद बनाने के क्रम में 'वचन' पर विचार करेंगे। वचन यानि संख्या। वाक्य में कारकपद (कर्ता, कर्म, करण, सम्प्रदान, अपादान, अधिकरणादि) की संख्या पर विचार कर तदनुसार संस्कृतपदों का प्रयोग करना चाहिए। संस्कृत भाषा में तीन वचन हैं। एकवचन, द्विवचन तथा बहुवचन। नामानुसार एकवचन से एक वस्तु या व्यक्ति, द्विवचन से दो वस्तु/व्यक्ति आदि तथा बहुवचन से दो से अधिक तीन, चार, पाँच --- आदि वस्तुओं, व्यक्तियों --- आदि का बोध होता है।

वचन निर्धारण सम्बन्धी कुछ विशिष्ट नियम →

1. जाति के अर्थ में एकवचन का प्रयोग करना चाहिए। जैसे → बच्चे चंचल होते हैं → बालः चञ्चलः भवति।
2. समुदायकवाचक शब्द यथा → गण, कुल, समूह, ग्राम, समुदाय आदि शब्द बहुवचन का अर्थ देने पर भी सदा एकवचन में ही प्रयुक्त होते हैं। यथा → भक्त्या देवगणः हर्षति। विप्रसमूहः यज्ञे तिष्ठति। राक्षसकुलः देवेभ्यः क्रुध्यति। दनुजसमुदायः ईर्ष्यति।
3. द्वयम्, युगलम्, त्रयम् आदि शब्दों का प्रयोग एकवचन में हो। यथा → करद्वयम्, मुनित्रयं नमस्कृत्य, वर्षचतुष्टयमनुसृत्य।

शिष्टः अपरेद्युः। →

03-06-21

डॉ॰ निर्मल कुमार झा, स॰ प्राचार्य।
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ

शास्त्री अनिवार्यपत्रम्। 03-06-2021

साहित्य आनर्स। व्याकरणे पारिभाषिकशब्दाः।

१. नदी → "यू स्त्र्याख्यौ नदी।"
(दीर्घ) ईकारान्त (दीर्घ) ऊकारान्त नित्यस्त्रीलिङ्गशब्दाः नदी संज्ञकाः भवन्ति। यथा- गौरी, नदी, वधू।
नित्यस्त्रीलिङ्गशब्दाः ते येषां स्त्रीलिङ्गातिरिक्तेषु अन्यलिङ्गेषु प्रयोगाः न भवन्ति।
'श्रेयसी' शब्दः ईकारान्तस्त्रीलिङ्गम् अस्ति अतएव नदीसंज्ञकः किन्तु 'बहुश्रेयसी' सामासिकपदम् अस्ति।
अत्र श्रेयसीपदं गौणम् अस्ति। अतएव अस्य नदीसंज्ञा "प्रथमलिङ्गग्रहणञ्च" वार्तिकेन भवति।

२. घि → "शेषो घ्यसखि।"
सखि शब्दं हित्वा (त्यक्त्वा) नदीसंज्ञकभिन्नाः इकारान्ताः उकारान्ताः च शब्दाः "घि" संज्ञकाः भवन्ति।
यथा - हरि, भानु, गुरु आदयः।

३. अपृक्त → "अपृक्त एकाल् प्रत्ययः।"
यो प्रत्ययः एकवर्णरूपः अथवा एकवर्णरूपं कृतमस्ति, तस्य अपृक्त संज्ञा। यथा → सखान् + स् (सु > स्), इत्यस्मिन् 'स्' एकवर्णरूपं कृतमस्ति। अतएव 'स्' इत्यस्य अपृक्त संज्ञा भवति।

४. प्रगृह्य → "ईदूदेद्द्विवचनं प्रगृह्यम्।" "अदसो मात्॥"
"निपात एकाजनाङ्॥" "ओत्॥",
"सम्बुद्धौ शाकल्यस्येतावनार्षे॥"
द्विवचनान्तशब्दस्य (ईकारान्त, ऊकारान्त, एकारान्त) 'प्रगृह्य' संज्ञा भवति। इयं प्रगृह्यसंज्ञा अन्त्य द्विवचनान्त्यशब्दस्य ईकारस्य, ऊकारस्य, एकारस्य भवति न तु शब्दस्वरूपस्य।
यथा → हरी द्विवचनान्तेऽस्य अन्त्य ईकारस्य प्रगृह्यसंज्ञा।
विष्णू पदे अन्त्य ऊकारस्य, गङ्गे पदे अन्त्य एकारस्य प्रगृह्य संज्ञा स्यात्।

डॉ॰ निर्मल कुमार झा (स॰ प्राच
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णि